सत्वम् अमनुष्याणां मनुष्यभिन्नानां गन्धर्व्वादीनां सम्भवात् सहस्रायुष्यं भवति मनुष्याणां तु तदसम्भवात्” कर्क० ।

**अमनोगत** त्रि० न मनोगतः । १ अनभिप्रेते २ मनसाऽचिन्तिते । [अगृहीते २अनभिप्रेते च

**अमनोनीत** त्रि० न मनसा नीतः गृहीतः । १ मनोवृत्त्या

**अमनोयोग** पु० मनसो योगः विषयेषु सावधानतया संयोजनम् अभावे न०त० । अवधानाभावे तत्त्वनिर्णायकमनोवृत्त्यभावे । न०ब० । तच्छून्ये त्रि० ।

**अमनोहर** त्रि० विरोधे न०त० । रम्यभिन्ने कुत्सिते ।

**अमन्तु** त्रि० मन्तुर्मन्ता मन–तुन् न०त० । अज्ञातरि “अकर्मा दस्युरभितो अमन्तुरन्यव्रतः” ऋ०१०,२२,८ १ मन्तुरपराधः न०ब० । २ तच्छून्ये त्रि० ।

**अमन्त्र** त्रि० नास्ति मन्त्रः पाठ्यो यत्र कर्मणि । १ मन्त्रशून्ये कर्म्मादौ “सायं त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्” मनुः नास्ति मन्त्रः मन्त्राध्ययनमस्य । २ वेदपाठशून्ये “अव्रतानाममन्त्राणां जातिमात्रोपजीविनां नैषाम् प्रतिग्रहो देयः” “निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमितीरिताः” इति च मनुः । वा कप् । अमन्त्रकोऽप्युभयत्र “अमन्त्रकं तु शूद्रस्य सर्व्वकर्म्माणि कारयेत्” अमन्त्रकस्य शूद्रस्य विप्रोमन्त्रेण गृह्यते” इति च स्मृतिः । [क्लिष्टे च ।

**अमन्द** त्रि० विरोधे न०त० । १मन्दभिन्ने पटौ २उत्-

**अमम** त्रि० नास्ति ममेत्यभिमानः गेहादिषु यस्य । गृहपुत्रादिषु ममेत्यभिमानशून्ये “शरण्येष्वममश्चैव वृक्षमूलनिकेतनः” मनुः । २ जिनविशेषे पु० । अममकारादयोऽत्र

**अमर** पु० मृ-पचाद्यच् न०त० । बहुकालस्थायितया मृत्युहीने देवे, “तत्रामरालयमरालमरालकेशी” नै० “सुषाव रत्नानि हरामराङ्गनाः” माघः । तीरयुक्तराणि क्रमशः प्लवङ्गमनरामराः” मनुः अष्टशाब्दिकमध्ये २ अमरसिंहनामके शाब्दिके, “पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः” इति कविक० । स च काण्डत्रययुक्तलिङ्गानुशासनकोषकर्त्ता विक्रमादित्यसभासदनवरत्नमध्ये,न्यतमः “धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कु वेतालभट्टघटकर्परकालिदासाः । ख्यातोवराहमिहिरोनृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य” शङ्कुः सुवाग् वररुचिर्मणिरंशुदत्तो जिष्णुस्त्रिलोचनहरी घटकर्पराख्यः । अन्येऽपि सन्ति कवयोऽमरसिंहपूर्व्वा यस्येह विक्रमनृपस्य सभासदोऽमी” इति च ज्योतिर्विदा० । ३स्नुहीवृक्षे, स हि छिन्नोऽपि पुनःपुनः प्ररोहति, सहसा न म्रियते । ४ पारदे तस्य वङ्गादौ बहुतापनेऽपि न ध्वंसः । अपादाने वा अप् । तत्रैव तस्य सेवने हि मृत्युराहित्यम् रसेश्वरदर्शनशब्दे वक्ष्यते । ५ अस्थिसमुच्चये च स हि बहुकालं भूमौ स्थितोपि न जीर्य्यति । स०ब० ६ मरणशून्ये त्रि० । “अजरामरवत् प्राज्ञो विद्यामर्थांश्च चिन्तयेत्” हितो० “उत्पादयति सावित्र्या सा नित्या साऽजराऽमरा” मनुः ज्योतिषोक्ते ७ विवाहयोटकार्थे नक्षत्रगणभेदे “हस्ताखातिश्रुतिमृगशिरःपुष्यमैत्राश्विभानि पौष्णादित्ये जगुरिह बुधा देवसंज्ञानि भानि” ज्यचिन्ता० अधिकं गणशब्दे दृश्यम् । मरुत्वतीगर्भजाते ८मरुद्गणभेदे पु० । “मारुत्वती च मरुतो देवानजनयत् सुतान् अग्निचक्षुर्हविर्ज्योतिः सावित्रं मितमेव च । अमरं शरवृष्टिञ्च सत्वञ्च महाभुजम्” इत्यादि हरिवं० ९ गुडूच्याम् १० दूर्व्वायां ११ वारुणीवृक्षे १२ महानिलीवृक्षे १३ घृतकुमार्य्याम् १४ स्नुहीवृक्षे च स्त्री । एतासां छेदनेऽपि पुनः प्ररूढत्वात् यथायथं दूर्मरत्वाच्च तथात्वम् । न म्रियतेऽनया करणे अप् । १५ जरायौ स्त्री । तच्चर्म्मणा वेष्टनेनैव जठरानलदाहनिवारणात् मरणनिवारकत्वात् तथात्वम् । १६नाभिनालायाम् राजनि० १७स्थूणायां गृहस्य सनिवारकत्वात्तथा । अमराः सन्त्यस्याम् अर्श आ०अच् । १८ इन्द्रपुर्य्याममरावत्यां स्त्री

**अमरकोष** पु० अमरेण कृतः कोषः । अमरसिंहकृते लिङ्गानुशासनाख्ये त्रिकाण्डात्मके अभिधानभेदे ।

**अमरज** पु० अमरः दुर्मर इव जायते जन–ड । दुष्खदिरे कालस्कन्दाख्ये खदिरभेदे दुर्मरत्वेन जातत्वात्तथात्वम् ।

**अमरदारु** पु०न० । अमराणां प्रियं दारु । देवदारुवृक्षे ।

**अमरद्विज** पु० अमरपूजकः द्विजः शाक० त० । देवले (पूजारीति) ख्याते विप्रे ।

**अमरपति** पु०६०त० । देवराजे इन्द्रे अमरभर्त्रादयोऽप्यत्रार्थे

**अमरपुष्पक** पु० अमरमविशीर्णं पुष्पं यस्य । १कल्पवृक्षे२इक्षुगन्धायां स्त्री । ३ काशतृणे पु० रत्नमा० ।

**अमरपुष्पी** स्त्री अमरमविशीर्णं पुष्पमस्याः जातित्वात् ङीप् । अवाक्पुष्प्याम् । कप् अत इत्त्वम् । अमरपुष्पिकाप्यत्र ।

**अमरप्रभु** पु०६त० । १विष्णौ तस्य सर्व्वेश्वरत्वात्तथा । २ शक्रे च

**अमररत्न** न० अमर इव शुद्धं रत्नम् । स्फटिके मणौ ।

**अमरराज** पु० ६त० टच् समा० । देवराजे इन्द्रे ।

**अमरलोक** पु० ६त० । १ स्वर्गे । अमराणामिव लोको भुवनं यस्य । २प्राप्तदेवलोके धार्म्मिके त्रि० । “तेषां स्वस्य गवर्त्त-